सुरश्मिकाश्मीरम्

(आंग्लभाषानुवादसहितं संस्कृतकाव्यम्)

प्रणेता
श्रीसुन्दरराजः

देववाणी-परिषद्, दिल्ली

६, वाणी-विहारः, नयी दिल्ली-११००५९

काश्मीरलावण्यगुणैः कवीन्द्रः
कान्तैरयं सुन्दरराजनामा ।
आकर्षितस्तर्षहरं ववर्ष
हर्षेण वर्षं कविताघटायाः ॥

(सुरश्मिकाश्मीरम्, १०८)

"काश्मीरसम्बन्धिषु काव्येषु श्रीसुन्दरराजेन १९८३ तमेशवीयेऽब्दे प्रणीतं सुरश्मिकाश्मीरम् भाषा-भाव-दृशा किमप्यपूर्वं वैशिष्ट्यं भजते। अष्टोत्तरशतोपजातिवृत्तात्मकेऽस्मिन् काव्ये कविना सरलसरसपदावल्यां काश्मीरप्रदेशस्य शोभा उपवर्णिता। नैकवारं काश्मीरं गतेन कविना अमरनाथगुहापर्यन्तं यद्यद्रामणीयकमनुभूतं तस्य तस्याभिव्यक्तिरस्मिन् काव्ये कृता। काश्मीरस्य प्राकृतिकं रामणीयकं, सांस्कृतिकं गौरवं, प्राक्तनं श्रुतं वैभवम्, इदानीन्तनं च दृष्टं सौन्दर्यं कवेर्लेखन्याः प्रसूतं सत् सचेतसां चेतांसि रञ्जयति। ...... कविना वैदर्भी शैली सर्वत्रावलम्बिता। ......कवेः स्वदेशभक्तिभावोऽस्य काव्यस्य जीवातुः।"

(—डा० रमाकान्त शुक्लः
सुरश्मिकाश्मीरस्य प्रास्ताविके)

सुरश्मिकाश्मीरम्

काश्मीरलावण्यगुणैः कवीन्द्रः कान्तैरयं सुन्दरराजनामा।
आकर्षितस्तर्षहरं ववर्ष हर्षेण वर्षं कविताघटायाः॥

(सुरश्मिकाश्मीरम्/१०८)

'Thus, attracted by the qualities of the beauty of Kashmir, Sundararajan, a leader among poets, gave forth this fulfilling rain of poetry.'

(*The Resplendent Kashmir*, 108)

सुरश्मिकाश्मीरम्

(आंग्लभाषानुवादसहितं संस्कृतकाव्यम्)

प्रणेता :

श्रीसुन्दरराजः

एम० एस-सी० (रसायनशास्त्रे), आइ०ए०एस०

भारतसर्वकारस्य योजनायोगे संयुक्तसचिवः

नयी दिल्ली-११०००१

१९८३

प्रकाशिका

देववाणी-परिषद्, दिल्ली

६, वाणी-विहारः, नयी दिल्ली-११००५९

(भारतम्)

सुरश्मिकाश्मीरम्
(आंग्लभाषानुवादसहितं संस्कृतकाव्यम्)

लेखकः : श्रीसुन्दरराजः

प्रकाशिका : देववाणी-परिषद्, दिल्ली
६, वाणी-विहारः, नयी दिल्ली-११००५९

मुद्रकः : देववाणी प्रिण्टर्स
उत्तम नगर, नयी दिल्ली-११००५९

संस्करणम् : प्रथमम् १९८३

मूल्यम् : विंशति रूप्यकाणि रु० २०-००

वितरकः : देववाणी-प्रकाशनम्
६ वाणी-विहारः, नयी दिल्ली-११००५९

SURASHMIKASHMIRAM
(Sanskrit Poetry with English Translation)

Author : S. Sundararajan

Publisher : Devavani Parishad, Delhi
6, Vani Vihar, New Delhi-110059

Printer : Dev Vani Printers
Uttam Nagar, New Delhi-110059

Edition : First, 1983

Price : Rupees Twenty only Rs. 20-00

Distributors : Devavani Prakashanam
6, Vani Vihar, New Delhi-110059

क्रमः

१.	अभिमतम्	: डा० वरदाचार्यकण्णन्	(आ)
		डा० रामकरण शर्मा	(इ-ई)
२.	प्रास्ताविकम्	डा० रमाकान्त शुक्लः	(क-ज)
३.	पुरोवाक्	: श्री सुन्दरराजः	(झ-ठ)
४.	सुरश्मिकाश्मीरम्	: श्रीसुन्दरराजः	(१-१६)
५.	*The Resplendent Kashmir* (English Translation of Surashmi Kashmiram)	: S. Sundararajan	(१६-२८)

हैदराबादकेन्द्रीयविश्वविद्यालयस्य गणितविभागे
प्रवाचकानां डा० नावलपक्कम् वरदाचार्य कण्णन्
महाभागानाम्

अभिमतम्

(१)

श्रीसुन्दरावनिपते ! कविताङ्गना ते
प्रासादमन्दगतिरध्वनि गूढभावा ।
उत्प्रेक्षयैव रसिकस्य मनः प्रविष्टा
श्लेषादिनान्तरधिकां रतिमातनोति ॥

(२)

सप्लवगेहजलाशयमुख्यान्
चक्षुर्विषयानिव कुरुतेऽद्य ।
विप्लवगेहजडाशयकथकैः
अलमलमन्यैः कविभिरनेकैः ॥

—वरदाचार्य कण्णन्

भारतसर्वकारस्य शिक्षासंस्कृतिमन्त्रालये संयुक्तपरामर्श-
दातृणाम् डा० रामकरणशर्ममहाभागानाम्

अभिमतम्

जयति श्रीसुन्दरराजः कविशिरोमणिः !
जयति च तदीयं काव्यगीतं सुरश्मिकाश्मीरम् !

अनन्यसामान्यः खलु रामणीयकसमवायः सुरश्मिकाश्मीरीयः। एकतस्तु परमरम्य एष भारतदेशः। अपरतश्च तदीयरम्यतायाः सारभूतो गिरिनिर्झर-वनद्रुमपुष्पफलमालालङ्कृतः कविकुलकुमुदकलाधरः परमरमणीयो भूस्वर्गः कश्मीरप्रदेशः। क्षणे क्षणे नवतामुपेयुषी पुनः पुनर्जायमाना पुराणी च गीर्वाणवाणी कोमलकान्तनदध्वनिः परमरमणीया। तदेतत्त्रितयमपि रामणीयकमेकत्र सङ्गमयति यथार्थनामा कविरेष श्रीसुन्दरराजः। अष्टोत्तरं शतमुपजातयः सुरश्मिकाश्मीरीयाः कस्य वा न हरन्ति मनः सहृदयस्य ? क्षणमुत्पतेम वयमपि सुन्दरकाव्यगगने :—

शीतैः प्रवातैस्तरुरेष धूतो
घातैः शिलानां च मृदां हिमानाम्।
पातैरपि स्वामृजुताममुञ्चन्
ख्यातः स्वनाम्ना भुवि देवदारुः॥

(सुरश्मिकाश्मीरम्/४)

देवदारुवर्णनमिषेण "न सज्जनः सज्जनतां जहाति कृच्छ्रैरनेकैः परिपीड्यमान" इतीदं सनातनं तत्त्वं मनोज्ञया शैल्याऽभिहितमभिव्यक्तं वा कविना।

अदभ्रशष्पासु तृणस्थलीषु
चरन्ति मेषा मृदुरोमशेषाः ।
रोमाणि येषां विनिकृत्य वासो
वितन्वते शीतनिवारणाय ॥

(सुरश्मिकाश्मीरम्/१६)

कीदृगयं सुललितः स्वाभावोक्तिचमत्कारः । अवितथमाह कविरुपसंहरन् काव्यमिदम् :—

काश्मीरलावण्यगुणैः कवीन्द्रः
कान्तैरयं सुन्दरराजनामा ।
आकर्षितस्तर्षहरं ववर्ष
हर्षेण वर्षं कविताघटाया ॥

(सुरश्मिकाश्मीरम् १०८)

नूनमेष कविरर्हति वर्धापनाः सुरभारतीप्रणयिनाम् । वर्धतां सुन्दरराजः । वर्धतां सुरश्मिकाश्मीरम् ।

विदुषां वशंवदः
रामकरण शर्मा

प्रास्ताविकम्

'देववाणी-परिषद्,दिल्ली'-इत्येतस्याः संस्थायाः 'सद्ग्रन्थ-प्रकाशन-योजनायां' श्रीसुन्दरराजप्रणीतस्य 'सुरश्मिकाश्मीरस्य' प्रकाशनं क्रियते। श्रीसुन्दरराजमहाभागस्य परिचयोऽस्माभिः तत्प्रणीतायाः परिषत्प्रकाशितायाः 'श्रीबदरीशतरङ्गिण्याः' प्रास्ताविके दत्तः। अतस्तदर्थं जिज्ञासुभिः 'श्रीबदरीशतरङ्गिणी' द्रष्टव्या। तत्रैवास्माभिः 'सुरश्मिकाश्मीरस्य' शीघ्रमेव प्रकाशनमाशासितमासीत्। तच्चेदानीमनुष्ठीयते।

भारतस्योत्तमाङ्गभूतं 'काश्मीरं' विषयीकृत्य संस्कृतभाषायां पुराणकारैः, शास्त्रकारैः कविभिश्च बहु निगदितम्। महाभारते काश्मीरमण्डलं 'सर्वपुण्यं' 'महर्षिभिश्चाध्युषितं' प्रोक्तम्—

काश्मीरमण्डलं चैतत् सर्वपुण्यमरिन्दम।
महर्षिभिश्चाध्युषितं पश्येदं भ्रातृभिः सह॥

(महा०/वन०/१३०/१०)

तत्र काश्मीरमण्डले वहन्तीनां नदीनां माहात्म्यं सविशेषमुद्घोषितम्—

सप्ताहं चन्द्रभागां वै वितस्तामूर्मिमालिनीम्।
विगाह्य वै निराहारो निर्मलो मुनिवद्भवेत्॥७॥
काश्मीरमण्डले नद्यो याः पतन्ति महानदम्।
ता नदीः सिन्धुमासाद्य शीलवान् स्वर्गमाप्नुयात्॥९॥

(महा०/अनुशासन०/२५/७, ९)

नीलमतपुराणं काश्मीरस्य संस्कृतेः, सभ्यतायाः, धार्मिककृत्यानां, स्थानानां, सरसां, जलप्रपातानां, नदी-निर्झरसङ्गमानां, मन्दिराणां, तीर्थाणां, जनतायाः, राज्ञां, तत्संघर्षाणाञ्च विस्तृतं वर्णनमुपन्यस्यति। स्कन्दादिषु तेषु तेषु पुराणेष्वपि काश्मीरस्य वर्णनं समुपलभ्यते।

कविकुलगुरुणा कालिदासेनापि कुमारसम्भवे देवतात्मनो नगाधिराजस्य

वर्णनप्रसङ्गेन अलकापुरीवर्णप्रसङ्गेन च, मन्ये, काश्मीरमण्डलस्यैव मनोहारि वर्णनं कृतम् ।

विल्हणकविना विक्रमाङ्कदेवचरितस्य अष्टादशे सर्गे काश्मीरस्य वर्णनं कृतम् । प्रथमे सर्गे च तेन शारदादेशे कुंकुमकेसराणां कवीनां च प्ररोहो वर्णितः ।

कल्हण - जोनराज - श्रीवर - शुकनामधेयैः कविभिस्तु काश्मीरस्य शोभावर्णनपुरस्सरं तस्य इतिहासोऽपि सविस्तरं व्यलेखि । कल्हणेन नील-मतपुराणमनुसृत्य स्वयं च समकालीनं घटनाचक्रं निरीक्ष्य राजतरङ्गिण्यां काश्मीरमण्डलस्य विषये प्रभूता सूचनाः प्रदत्ताः । तदनुसारं पुरा यत्र 'सतीसरः' आसीत्तत्रैव 'जलोद्भवं' घातयित्वा कश्यपेन काश्मीरमण्डलं निर्ममे—

पुरा सतीसरः कल्पारम्भात्प्रभृति भूरभूत् ।
कुक्षौ हिमाद्रेरर्णोभिः पूर्णा मन्वन्तराणि षट् ।।
अथ वैवस्वतीयेऽस्मिन् प्राप्ते मन्वन्तरे सुरान् ।
द्रुहिणोपेन्द्ररुद्रादीनवतार्य प्रजासृजा ।।
कश्यपेन तदन्तस्थं घातयित्वा जलोद्भवम् ।
निर्ममे तत्सरोभूमौ कश्मीरा इति मण्डलम् ।।

(राजतरङ्गिणी १/२५-२७)

तदिदं काश्मीरमण्डलं त्रिलोक्याः मण्डनम्—

त्रिलोक्यां रत्नसूः श्लाघ्या तस्यां धनपतेर्हरित् ।
तत्र गौरीगुरुः शैलो यत्तस्मिन्नपि मण्डलम् ।।

(कल्हणकृत-राजतरङ्गिणी १/४३)

अस्य काश्मीरप्रदेशस्य रामणीयकं वर्धयन्ति—शीते सोष्मस्नानगृहाः यादोविरहिताः निरुपद्रवाः नद्यः, ग्रीष्मेऽपि सन्तापाभावः, तुङ्गानि विद्या-वेश्मानि, कुंकुमं, सहिमं पयः, द्राक्षादिफलानि च—

सोष्मस्नानगृहाः शीते सुस्थतीरास्पदा रये ।
यादोविरहिता यत्र निम्नगा निरुपद्रवाः ।।
असन्तापार्हतां जानन् यत्र पित्रा विनिर्मिते ।
गौरवादिव तिग्मांशुर्धत्ते ग्रीष्मेऽप्यतीव्रताम् ।।
विद्यावेश्मानि तुङ्गानि कुङ्कुमं सहिमं पयः ।
द्राक्षेति यत्र सामान्यमस्ति त्रिदिवदुर्लभम् ।।

(कल्हणकृत-राजतरङ्गिणी १/४०-४२)

भावप्रकाशकारेण काश्मीरदेशजं कुंकुमं सर्वोत्तमत्वेन स्वीकृतम्—

काश्मीरदेशजे क्षेत्रे कुंकुमं यद्भवेद्धि तत् ।
सूक्ष्मकेशरमारक्तपद्मगन्धि तदुत्तमम् ॥
(भावप्रकाशे)

जैनकविः श्रीसिद्धिचन्द्रगणिरपि 'भानुचन्द्रचरिते' काश्मीरस्य शोभां वर्णयति—

इतः कश्मीरकिञ्जल्कपुष्पोद्गमदिदृक्षया ।
प्रतस्थे पृथिवीनाथः पुनः श्रीनगरं प्रति ॥

× × ×

पर्वतान् रत्नपंजाल - पीरपंजालकादिकान् ।
हिमैरभ्रंलिहैस्तुङ्गशृङ्गानुल्लङ्घ्य दुर्गमान् ॥
क्रमाद्गत्वाथ कश्मीरं दृष्ट्वा काश्मीरभूरुहान् ।
प्रफुल्लकुसुमामोदलोलरोलम्बचुम्बितान् ॥
(भा० च०, प्रकाशः ४, १०२, १०६, १०७)

कथासरित्सागरकारेण सोमदेवेन अन्यैश्चाप्यनेकैः कविभिः स्वस्वरचनासु काश्मीरशोभा वर्णिता । इत्थं काश्मीरस्य शोभां वर्णयन्तो वीक्ष्यन्ते पुराणकवयः ।

अर्वाचीनसंस्कृतरचनाकारैरपि काश्मीरस्य शोभा स्वस्वलेखन्याः विषयीकृता । कैश्चित् प्रसक्तानुप्रसक्त्या तद्वर्णनं कृतम् । कैश्चिच्च मुख्यतया काश्मीरशोभा उपवर्णिता । यैः प्रसक्तानुप्रसक्त्या काश्मीर-वैभवमुपवर्णितं तेषु अस्मत्पितृचरणाः 'कविरत्न' श्रीब्रह्मानन्दशुक्ला अन्ये च कवयः समायान्ति । दिङ्मात्रं प्रस्तूयते 'काश्मीर'-वर्णनं श्रीशुक्लकृतम्—

शारदा यत्र रमते नानारूपवती शुभा ।
देशः सोऽयं विभातीह रम्यः 'कश्मीर'-संज्ञकः ॥
यत्र केसरसम्बद्धा भूमयः सुषमाभृतः ।
देव्य इव विराजन्ते पीतवस्त्रैः सुसज्जिताः ॥
यत्र मम्मट-रूपेण प्रादुर्भूता सरस्वती ।
यत्राभिनवसम्पद्भिरालोकश्च प्रसार्यते ॥

× × ×

यत्र कामस्य पूजार्थं सुन्दर्यः पुष्पपाणयः ।
नद्या नीरञ्च तीरञ्च सेवन्तेऽहर्निशं मुदा ॥

यत्र प्रसूनगन्धाढ्यः पवनोऽतिमनोरमः ।
हिमभारनतो मन्ये मन्दं वाति सदैव हि ॥
विख्याता वैष्णवीदेवी भक्तसिद्धिप्रदायिनी ।
यत्र चामरनाथोऽपि राजते भगवान् भवः ॥
विविधैः फलभारैश्च विनता वनराजयः ।
हरन्त्य इव लक्ष्यन्ते नन्दनोपवनश्रियम् ॥
अर्थ-काम-पराधीना अपि धर्मप्रिया जनाः ।
आश्चर्यचकितान्नित्यं कुर्वन्ति प्रेक्षकानहो ॥
नाना-विहगजातीनां कूजनं श्रवणप्रियम् ।
हरतीव मनो यत्र, यात्रा-कर्म प्रकुर्वताम् ॥
शिवदग्धवपुः कामो हिमानी-परिसेवया ।
कलया शान्तिकामोऽपि ध्रुवं यत्र विराजते ॥

(नेहरूचरितम् २/१-११)

'नेहरूयशःसौरभ' - नाम्नि महाकाव्ये श्रीगोस्वामिवलभद्रप्रसादशास्त्री काश्मीरवर्णनप्रसङ्गे हिमाद्रिशृङ्गाणां, रमणीयनिर्झराणां, पुष्पितपल्लवित-महीरुहाणां, सरोवराणां, नवफुल्लकेसराणां, धवलैडका-व्रजानां, तरणीगृहाणाम्, अव्याजमनोहररमणीनां, साहित्यकाराणां, शिल्पिनाञ्च चर्चां करोति—

सुरेन्द्रशापाद्धरणीमिवागतं प्रखण्डमाखण्डल-लोकसम्पदाम् ।
विलोक्य काश्मीरमनन्तवैभवं न कामयन्ते सुजनास्त्रिविष्टपम् ॥
हिमाद्रिशृङ्गैः रमणीयनिर्झरैः सुपुष्पितैः पल्लवितैर्महीरुहैः ।
सरोवरैस्तैरिव दिव्यदर्पणैर्दिवं हसन्ती विहगैरुपत्यका ॥
द्विरेफझङ्कारचलद्दलोद्गिरत्सुगन्धबन्धैर्नवफुल्लकेसरैः ।
दिशोऽनुधावन्मधुरानिलैरियं न कस्य चित्तं कुरुते वशंवदम् ॥

× × ×

वनेचरैर्ग्राम्यजनैरितस्ततोऽनुगम्यमाना धवलैडकाव्रजाः ।
पिपासया वै वसुधासुधारसं मुदा रमन्तेऽम्बुदशावका इव ॥
सरोवरान्तस्तरणीगृहस्थितैस्तरङ्गसञ्चारविकम्पितस्वरैः ।
प्रियाङ्गसङ्गासवपानमन्थरैः प्रणीयते वै मधुयामिनी जनैः ॥
तुषारनिष्णातसमीरसिञ्चिताः स्वभाव-सीत्कार-सुधारसस्वनाः ।
अनङ्गरागा अपि सौम्यकन्यका अनङ्गरागस्वरगीतिका इव ॥

स्वदेहलावण्यतिरस्कृतश्रियश्चरन्ति नार्यो रमणीयदर्शनाः ।
यदङ्गमाक्रान्तविभूषणप्रभा विभाति चन्द्राङ्कितलक्ष्मसन्निभा ॥

× × ×

उपत्यकायामिह यत्कवीश्वरैरकारि साहित्यमुदारदर्शनैः ।
रसानुसन्धानविधौ विपश्चितां करोति तच्चारुपथप्रदर्शनम् ॥
अलङ्कृताः शिल्पकलाः कलाविदः प्रसाधनाच्छादनवास्तुरञ्जनाः ।
प्रहित्य देशान् स्वयशःसितैरिमे गुणैर्वयन्तीह दिगङ्गनापटम् ॥

(नेहरूयशःसौरभम् १/१८-२१)

एतत्पङ्क्तिलेखकेन जनेनापि भारतवैभववर्णनप्रसङ्गे एकपद्येन काश्मीर-शोभा सकेतिता—

गोस्तनीसेववपूर्णं मधुप्लावितं देवदारूद्वहं नौगृहैः रञ्जितम् ।
सुन्दरं यस्य काश्मीरकं राजते भूतले भाति तन्मामकं भारतम् ॥

(भाति मे भारतम्/४८)

मुख्यतया काश्मीरं विषयीकृत्य याः रचना प्रणीतास्तासु डा० श्यामदेव-पाराशरकृता 'काश्मीरसुषमा' (काव्यं) श्रीचूनीलाल'सूदन'-विरचितं दैनन्दिनी-वृत्तरूपं गद्यकाव्यं 'काश्मीरविहरणं' च मल्लोचनगोचरतां गते। श्रीसूदन-महाभागेन 'अमृतसर'-नगरात् प्रारब्धायाः स्व अमरनाथयात्राया गद्यमयं विवरणं लिखितम्। यद्यपि प्रकाशितसंस्करणेऽशुद्धीनां बाहुल्यं विद्यते तथापि यथार्थवर्णनदृशास्य ग्रन्थस्य महत्त्वं विद्यते। 'शिकारा'-विहरणं, निशातोद्यानविहरणं, क्षीरभवान्या दर्शनं, चश्माशाहीविहरणम्, श्रीनगरावलो-कनं, लद्दाखवासिनः, श्रीचन्द्रस्य स्थानावलोकनं, श्रीशङ्कराचार्यमन्दिर-दर्शनम्, अमरनाथयात्रां, पहिलग्राम-विवरणं, मामलेश्वरदर्शनं, चन्दनवाडीपर्यन्तं यात्रां, पिस्सुघाटीं, शेषनागशिविरवृत्तान्तम्, पञ्चतरणीशिविरम्, अमरनाथगुहामार्गं तद्दर्शनञ्च सरलसंस्कृतेन वर्णयति श्रीसूदनः।

मुख्यविषयत्वेन काश्मीरं सुन्दरतया वर्णयन्नपरः कविरस्ति **'सुरश्मि-काश्मीरस्य'** कर्ता श्रीसुन्दरराजः।

काश्मीरसम्बन्धिषु काव्येषु श्रीसुन्दरराजेन १९८३ तमेशवीयेऽब्दे प्रणीतं **'सुरश्मिकाश्मीरम्'** भाषा-भावदृशा किमप्यपूर्वं वैशिष्ट्यं भजते । अष्टोत्तरशतोपजातिवृत्तात्मकेऽस्मिन् काव्ये कविना सरलसरसपदा-वल्यां काश्मीरप्रदेशस्य शोभा उपवर्णिता। नैकवारं काश्मीरं गतेन कविना

अमरनाथगुहापर्यन्तं यद्यद्रामणीयकमनुभूतं तस्य तस्याभिव्यक्तिरस्मिन् काव्ये कृता। काश्मीरस्य प्राकृतिकं रामणीयकं, सांस्कृतिकं गौरवं, प्राक्तनं श्रुतं वैभवम्, इदानीन्तनं च दृष्टं सौन्दर्यं कवेर्लेखन्या: प्रसूतं सत् सचेतसां चेतांसि रञ्जयति। कवि: विश्वबन्धुत्वभावनया लोकप्रसिद्धस्य भारतस्योत्तर-भागे स्थितस्य काश्मीरस्य वर्णनं प्रथमपद्यादेव आरभते—

सख्येन विख्यातिमुपागतेषु देशेषु मुख्ये किल भारताख्ये।
प्रदिक्षु काश्मीर इति प्रसिद्धः प्रभाति कौबेरदिशि प्रदेशः ॥१॥

इत: परं कवि: बिम्बविधानकारिण्या शैल्या काश्मीरस्य तत्तद्वैशिष्ट्यमुन्मीलयति। काश्मीरस्य कियत्यो विशेषता: कविना एकस्मिन्नेव पद्ये कियता कौशलेन संयोजिता इति पश्यन्तु सहृदया:—

कान्तारशान्तः कुलशैलकान्तः कासारकूलैः करणानुकूलः।
कालो वसन्तः कविकोकिलानां काश्मीरसंज्ञो विषयो मनोज्ञः ॥६॥

काश्मीरप्रदेश: कान्तारै: शान्तोऽस्ति, कुलपर्वतहिमवता अत्यन्तं कान्तोऽस्ति, तस्य सरसां तटेषु स्थितानां प्राणिनामिन्द्रियाणि सुखं विन्दन्ति; कवयश्चैनं वीक्ष्य तथैव सुमधुरं गायन्ति यथा कोकिला: ऋतुराज वसन्तमवलोक्य पञ्चमस्वरेण गायन्ति। यदि नाम 'कवीन्द्र' विशेषण-विभूषित: श्रीसुन्दरराजोऽपि काश्मीरं त्रिवारं साक्षात्कृत्य मधुरं गातुं प्रवृत्तस्तदा सदृशमेव तस्य। यथावसरं कवि: श्रीनगर-शालीमारोद्यान - निशातोद्यान-क्षीरभवानी - हज़रतबल - डल झील - चार चिनार - चश्माशाही - गुलमर्ग - रामसरोवर - पहलगाम - लिड्डरनदी - शेषनाग - चन्दनवाडी - पिस्सुघाटी - पञ्चतरणी - अमरावती - अमरनाथगुहाप्रभृतीनां लोकोत्तरं किन्तु लोकसम्मतं भूगोलसम्मतं च काव्यमयं वर्णनं समुपन्यस्यति। तत्तत्स्थानसम्बन्धिनीनां जनश्रुतीनामपि स उल्लेखं विदधाति। स: वृत्रहा - खीष्ट - मुहम्मद - जहाँगीर - कल्हण - विल्हण - जगद्गुरुशङ्कराचार्य - श्रीरामानुजाचार्य - प्रभृतीनामपि काश्मीरसम्बन्धिनमुल्लेखं करोति। आधुनिकपर्यटकानां वेशभूषा-प्रवृत्ति तथा 'केशर' - 'काँगडी' - 'सेवफलोद्यान'-'देवदारु' - 'मेष'-प्रभृतीनापि स वर्णयति। इत्थं कवे: लोकशास्त्रकाव्याद्यवेक्षणजन्या व्युत्पत्ति: सर्वत्र काव्येऽवलोकनीया।

कविना वैदर्भी शैली सर्वत्रावलम्बिता। असमासा अल्पसमासा वा मसृणा शैली सर्वथा विषयानुरूपा। दिङ्मात्रमुदाह्रियते—

क्वचिन्नतश्च क्वचिदुन्नतश्च क्वचिज्झरीणां मुखरो रवैश्च ।
क्वचित्प्रशान्तैर्भरितो वनान्तैः क्वचित्तुषारावृतपर्वतैश्च ॥३॥

अत्र केवलं 'वनान्तैः' इति 'तुषारावृतपर्वत' इति च पदद्वयं विहाय सर्वाण्यपि पदानि असमस्तानि । एवमेव प्रायः सर्वत्र दृश्यते । प्रथमतृतीय-पादयोरन्ते शब्दा न क्वापि खण्डिताः । प्रतीयते यत् कवेर्मनोभावानुसारं शब्दानामहमहमिकया परापतनं भवति ।

कविना विज्ञानिनः किमर्थमाहूता इति पश्यन्तु रसिकाः —

विज्ञानिभिस्तत्र विचारणीयं विवस्वता विस्फुरता विनैव ।
विकासमायान्ति विचित्रमत्र विलासिनीनां वदनाम्बुजानि ॥२९॥

सुरश्मिकश्मीरे प्रायोऽपृथग्यत्ननिर्वर्त्या एव अलङ्कारा दृश्यन्ते । उत्प्रेक्षा कवेरधिकं प्रिया । अनुप्रास (६)-रूपक (६) - समासोक्ति (४) - उपमा (७)-स्वभावोक्ति-(२८)-निरुक्ति (८६)-प्रभृत्यलङ्काराः काव्यशोभा-कर्तृत्वेन तिष्ठन्ति । कवेः कल्पना मनोहारिणी । पश्यन्तु सहृदयाः—

काश्मीरनाम्नी तरुणी किमेषा हेमन्तशीतौ किमृतू निशीथः ।
किं कम्बलोऽयं धवलस्तुषारः शेते यमावृत्य नतोन्नताङ्गी ॥ (३३)

कवेः स्वदेशभक्तिभावोऽस्य काव्यस्य जीवातुः । अमरनाथगुहावर्णन-प्रसङ्गे (९८-१०६) कवेर्विचारकत्वं दार्शनिकत्वं वापि साक्षात्कर्तुं शक्यते ।

कविः श्रीसुन्दरराजः काव्यमुपसंहरन् सूचयति यत्तेनास्य रसपूर्णस्य काव्यस्य रचना कान्तैः काश्मीरलावण्यगुणैराकृष्टेन कृता । काश्मीरप्रदेशश्च अद्वितीयो द्युद्युतिर्विद्योतते : —

एवं सनाथोऽमरनाथधाम्ना प्रान्तः प्रशान्तोऽमरराजहृद्यः ।
काश्मीरनामा कविकामसीमा विद्योतते द्युद्युतिरद्वितीयः ॥ (१०७)
काश्मीरलावण्यगुणैः कवीद्रः कान्तैरयं सुन्दरराजनामा ।
आकर्षितस्तर्षहरं ववर्ष हर्षेण वर्षं कविताघटायाः ॥ (१०८)

वस्तुतः कवेरयं नवः प्रबन्धः काश्मीरस्य शोभां दधान एव संलक्ष्यते—

आमोदवाही रसिकाननानामयं रसानां रुचिरैः प्रवाहैः ।
सुवर्णपूर्णस्सुमनोमनोज्ञः कवेर्नवः कश्चिदिव प्रबन्धः ॥

श्रीसुन्दरराजमहाभागेन पुरोवाचि स्वकाव्यरचनायाः पूर्वपीठिका दत्ता परिशिष्टे च आंग्लानुवादो दत्तः । आभ्यां नूनं पाठका लाभान्विता भविष्यन्तीति

आशास्यते। यदि कश्चित् शोधार्थी 'संस्कृत-साहित्ये काश्मीरवर्णनम्' इति विषयमधिकृत्य शोधकार्यं कुर्यात्तदा तस्मै इदं काव्यमुपादेयं स्यात्।

भारतसर्वकारस्य शिक्षासंस्कृतिमन्त्रालये संयुक्तसचिवपदमलङ्कुर्वद्भिः काव्यरसिकैः डा० रामकरणशर्ममहाभागैरियं कृतिः व्यस्ततायामपि समास्वादिता तदर्थं ते धन्यवादार्हाः। २०-११-१९८१ तारिकायां परिषदि 'सुरश्मि-काश्मीरस्य' कविमुखेन पाठोऽभूत्। तस्मिन्नवसरे डा० वरदाचार्यकण्णन्-महाभागेन पद्यद्वयेन अस्य काव्यमयी समीक्षा कृतासीत्। साप्यत्र प्रारम्भे दीयते। डा० कण्णन्महाभागा अपि धन्यवादार्हाः।

अहं श्रीसुन्दरराजमहाभागानान् वर्धापयामि यैरस्याः सत्काव्यकृतेः रचनां कृत्वा संस्कृतसाहित्यस्य श्रीवृद्धिर्विहिता। परिषत्पक्षत एतेभ्यो धन्यवादान् व्याहरामि यदेतैरस्याः काव्यकृतेः प्रकाशनमितोऽनुमतम्।

कृपालवः पाठकाः क्वचिज्जातान् मुद्रणप्रमादान् संशोधयितुं सादर प्रार्थ्यन्ते।

विदुषां वशंवदः

रमाकान्त शुक्लः

(डा० रमाकान्त शुक्लः)
महासचिवः
देववाणी-परिषद्, दिल्ली

२४-१२-१९८३
६ वाणी-विहारः,
नयी दिल्ली-११००५९

पुरोवाक्

"काश्मीर" इति कथितमात्रेण को वा प्रकृतिलावण्यपीयूषपिपासुः कुतूहलपुलकितहृदयो न भवेत् ? कल्पनयैव सोऽनल्पानि मधुरमधुराणि काश्मीरदृश्याणि सहसा विलोकयितुमुद्यतो भवेदपि । क्वचन वचनातिशायि-महिमयुता हिमयुतशिखरहैमवतपर्वतमाला । क्वचिद्रुचिरवाचालवीचीनिचय-परिकर्मितशर्मनर्मप्रदनिर्झरिणीनिवहनिसृष्टमर्मरनिनदः । क्वापि व्यापितपिहित-गगनावकाशगहनो विपिनकलापः । अभीक्ष्णवीक्षणेनाप्यक्षीयमाणक्षण-वितरणचणं,

"क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः ।"

इति महाकविमाघवचनं निरूपयन्तमिव विराजमानं काश्मीरनामानं प्रदेशं को वा मुहुर्मुहुर्न सिसेविषेत ? ।

अयमेव स प्रदेशः यः पुराणेषु गन्धर्वलोक इति परस्तादितिहासेषु गान्धारदेश इति च कीर्तितः । क्रीष्टो जेसुरपि प्रदेशमिममेव "प्रतिश्रुतप्रदेशः" इति स्वानुचरेभ्यः आचख्यावित्याख्यायते । काष्ठकीलनात्परमनुचरैः विमोचितः सोऽत्रैवागत्य निजजीवितस्य परार्धं यापयामासेत्यपि काचन किंवदन्ती श्रूयते । परन्तु अनेकेषां मते सा निराधारा केवलमूहामात्रा । "एरिक् वान् डेनिकन्" नामा कोऽप्यमेरिकादेशीयः पौराणिकतथ्यान्वेषकः स्वयं काश्मीरमागत्य तथ्यमिदं गवेषितवान् । अस्मदीयसनातनधर्मगुरवः श्रीशंकररामानुजप्रभृतयोऽपि स्वजीवितकाले स्वयमत्रागत्य तत्त्वाववोधं तथा तपसा सिद्धिमपि प्रापुरिति तेषामितिहासादेव ज्ञायते - तत्काले बहवः शास्त्रेषु दृष्टपाराः पण्डितशौण्डाः संस्कृतविचक्षणा अत्र विलेसुः । शताधिक-ग्रन्थप्रणेता स कविवरः क्षेमेन्द्रः तथा कल्हणबिल्हणाद्याः कवयोऽपि नृपसभा-मितोऽलञ्चक्रुरिति पुनरितिहासतो ज्ञायते ।

पश्चात्कालीनेन इतिहासेन विदितं भवति यदा महम्मदीयानामाक्रमणं अभूत् तदा काश्मीरराज्यमपि मुगलराज्यान्तर्भुक्तमजायतेति । शृंगारसारवेदी मुगलचक्रवर्ती जहाँगीर् काश्मीरद्रोण्याः लावण्येन भृशमाकृष्टोऽसकृत् सान्तः-पुरोऽत्रागत्य विरामेण शर्म नर्म च लेभे । मुगलशासनकाले शालीमार्निशात्-

प्रभृतीनि बहूनि प्रसूनोपवनानि अत्र प्रणीतान्यासन् यानि अद्यापि पथिकानां चेतांसि प्रसभं हरन्ति ।

वसन्तग्रीष्मसमययोः निश्शेषेयं द्रोणी पल्लवितप्रभूतपादपप्रसूतानेकवर्ण प्रसूनमनोहरी नरीनृत्यति । तथैव वर्षाशरत्कालयोः फलितबहुविधरुचिरफल-भरनमिततरुषण्डमण्डितोद्यानवनभरिता दरीदृश्यते । शिशिरहेमन्तयोः हिमपात-जातहिमावरणतो बृहदवदातकम्बलपरिवृतेव वरीवर्ति । एवं सर्वतुंषु रमणीयं प्रदेशमिमं दिदृक्षुर्लोकः दिगन्ततो दिने दिने आकाशयानेनाप्यायाति । सपाथेयाः पाश्चात्यदेश्याः भारतीयाश्च प्रालेयगूढं हिमगिरिशिखरमारोढुमत्रागच्छन्ति । शिशिरहेमन्तयोः पुनः गुल्मार्गनाम्नि स्थाने निबिडरोमवसनानि वसानाः जनाः तुषारखण्डोपरि विहरन्ति ।

काश्मीरराज्यस्य राजधानी तु रमणीयसंनिवेशा श्रीनगराभिधाना नगरी । तस्याः अन्तः अन्तिके च बहूनि दर्शनयोग्यानि स्थानानि वर्तन्ते, यथा दल-तटाकः, नगीन् तटाकः, शालिमार्निशातनामनी उद्यानवने, श्रीशंकराचार्य-गिरिः, हस्रत्बल्मस्जिद्, निवासनौकाः प्लवमानोद्यानानि इत्यादि इत्यादि । नवदम्पतयः तथा सकुटुम्बाः कुटुम्बिनोऽपि दलतटाके शिकाराप्लवैर्नीयमाना-स्सुखमनुभवन्ति । राज्यस्य पूर्वखण्डे अवस्थितो लदाकनामा प्रान्तः प्रकामं-प्रशान्तः एकान्तसेवनीयश्च । विद्रुमतया सः भूतलपतितशशाङ्कमण्डलखण्ड-सदृशो दृश्यते । विरलानि किल तत्र वृक्षगुल्मानि । वितृणाः विशालाश्च शैलास्तत्र जीर्णविकीर्णपुरातनदुर्गसदृक्षा लक्ष्यन्ते । लदाकयात्रायै बहवः पाश्चात्त्यदेशीयाः सकुतूहलमायान्ति । परन्तु अस्मिन् प्रदेशे यात्रायोग्यः समयः सीमितः केवलं वर्षाशरत्कालमितो भवति । अत्यन्तशैत्यहेतोः हिमपात-तश्च अन्यकालेषु यात्रा श्रमसाध्या जायते ।

पावनभारतभूमेरन्याः प्रदेशा इव काश्मीरप्रदेशोऽपि देवमन्दिरैः दिव्य-क्षेत्रैश्च परिमण्डितो वर्तते । जम्मुनगरतो नातिदूरे गिरिशिखरे शोभते श्रीवैष्णवीगुहालयो यं सेवितुं प्रतिसंवत्सरं नियुतादप्यधिकसंख्याकाः यात्रिण आगच्छन्ति । तथैव शारदपूर्णिमापुण्यतिथौ प्रतिवर्षं बहुसंख्याकाः भक्तजनाः हिमगिरिमध्ये नद्याः अमरावत्यास्तीरे बृहतीं गुहामध्यासीनं लिंगात्मकं गुहगुरुं प्रणम्य कृतार्थीभवन्ति ।

एतादृशप्राकृतिकसौन्दर्यपरिपूर्णं काश्मीरराज्यं पर्यटितुमहमपि पर्युत्सुको-ऽभूवमित्यत्र किं वा विचित्रम् ? । सुयोगमवाप्य द्विः त्रिः तत्र गत्वा तल्ला-वण्याहृतान्तरंगोऽप्यभूवम् । स्वानुभूतिजनितनिर्बृतिमन्यैस्समं विभज्य

बुभुक्षया "सुरश्मिकाश्मीरा"ख्यमिदं लघुकाव्यं व्यरचयम्। काव्यस्यास्य साधुत्वासाधुत्वे भावुकाः पण्डितजना एव प्रमाणम्। उत्तरस्यां दिशि तिष्ठन्तं देवतात्मानं नगाधिराजं वर्णयता महाकविना यदुपजातिवृत्तमवलम्बितं तदेवावलम्ब्य पूर्णमिदं काव्यं मया चपलबुद्धिना विनिर्मितम्। जानामि पुनः केवलं वृत्तसाम्येन काव्यगुणसाम्यं न संपादयिष्यते। क्व महाकविः क्वाहं क्षुद्रः कश्चिमन्यः कुकविः ? क्व पुनस्स मनोहरप्राकृतिकलावण्यललितः काश्मीरप्रदेशः क्व मे सीमितभावाविष्कारिणी क्षुद्रकविता ?। शकुन्तलायाः चित्रमालिखतः तस्याः सर्वावयवसौष्ठवं प्रतिफलितुमक्षमतया विषीदतः दुष्यन्तस्य वचसा महाकविना यदुक्तं तत् काश्मीरलावण्यवर्णनाक्षमक्षामकविताप्रणेतरि मय्यप्यन्वेति यथा,

"यद्यत्साधु न काव्ये स्यात् वर्ण्यते तन्न वाऽन्यथा।
तथाऽपि तस्य लावण्यं लेखया किंचिदन्वितम्॥"

काव्यमेतत्प्रकाशयन्त्यै निरन्तरनिर्वर्त्यमानदेववाणीसेवायै दिल्लीनगरस्थदेववाणी परिषदे, मदीयं कार्तज्ञ्य निवेदयामि। एतत्कृते कृतभूरिपरिश्रमेभ्यः परिषदो महासचिवपदं तत्त्रैमासिकपत्रस्य 'अर्वाचीनसंस्कृतस्य' प्रधानसम्पादकपदमलङ्कुर्वद्भ्यश्च डा० श्रीरमाकान्तशुक्ल महोदयेभ्योऽपि मम कृतज्ञतां व्याहरामि। तैः सनाथा देववाणी-परिषदपि सदा देववाण्याः सेवां कुर्वाणा बहूनामन्येषामपि अर्वाचीनसंस्कृतग्रन्थकर्तृणां प्रबन्धान् प्रकाशयन्ती चिरं विजयतां भुवीति भगवति प्रार्थये।

२४-१२-१९८३ श्रीसुन्दरराजः

शुद्धिपत्रम्

अशुद्धम्	शुद्धम्	श्लोकाङ्कः
नाकी भवति	नाकीभवति	९
० मादधन्ति	० माचरन्ति	१०
कलितांगरागा:	कलिताङ्गरागा	१९
कुतूहलीमतीव	कुतूहलीममतीव	२२
० मादधन्ति	० मावहन्ति	४६
० नम्बर०	० डम्बर०	५३
पुरो	पुरी	७६

श्रीसुन्दरराजविरचितम्

।। सुरश्मिकाश्मीरम् ।।

(१)

सख्येन विख्यातिमुपागतेषु देशेषु मुख्ये किल भारताख्ये ।
प्रदिक्षु काश्मीर इति प्रसिद्धः प्रभाति कौबेरदिशि प्रदेशः ।

(२)

स पीरपञ्जालहिमाचलाभ्यां सदा तुषारावृतशेखराभ्याम् ।
समावृतस्संततशीतलोऽपि हिमप्रपातैश्शिशिरेऽतिशीतः ।।

(३)

क्वचिन्नतश्च क्वचिदुन्नतश्च क्वचिज्झरीणां मुखरो रवैश्च ।
क्वचित्प्रशान्तैर्भरितो वनान्तैः क्वचित्तुषारावृतपर्वतैश्च ।।

(४)

शीतैः प्रवातैस्तरुरेष धूतः घातैश्शिलानाञ्च मृदां हिमानाम् ।
पातैरपि स्वामृजुतामसुञ्चन् ख्यातः स्वनाम्ना भुवि देवदारुः ।।

(५)

आसेव्यमानाः हिमशीतवातैः यत्राचलाः श्यामवनान्तरम्याः ।
उत्तिष्ठदभ्युन्नतदेवदारु - स्तोमेन रोमाञ्चमुदञ्चयन्ति ।।

(६)

कान्तारशान्तः कुलशैलकान्तः कासारकूलैः करणानुकूलः ।
कालो वसन्तः कविकोकिलानां काश्मीरसंज्ञो विषयो मनोज्ञः ।

(७)

आमोदवाही रसिकाननानमयं रसानां रुचिरः प्रवाहैः ।
सुवर्णपूर्णस्सुमनोमनोज्ञः कवेर्नवः कश्चिदिव प्रबन्धः ।।

(८)

अयं सुमोद्यानवनाभिरामः तथा फलोद्यानवनोपभोग्यः ।
नगैर्नदीभिर्विपिनैश्च सेव्यः निवेशितो नन्दननिर्विशेषः ।।

(९)

काश्मीरलावण्यहृतान्तरंगः स वृत्रहाऽपि त्रिदिवं विहाय ।
अत्रैव नित्यं तनुते निवासं येनैष नाकी भवति प्रदेशः ।।

(१०)

प्रभोर्मघोनः किल लोभनीयः निवास इत्यस्य नवीकृतेः किम् ।
प्रत्यब्दमब्दास्स्वयमादधन्ति सुधाविलेपं तुहिनच्छलेन ।।

(११)

अयं हि लोकस्स पुराणविद्भिराशंसितो गानविचक्षणानाम् ।
गन्धर्वनाम्नां गगनेचराणां सुवर्गतुल्यः सुरयोनिजानाम् ।।

(१२)

क्रीष्टस्स जेसुः स्वपदानुगेभ्यः प्रतिश्रुतं प्राह यमेव देशम् ।
भुवि च्युतो नाक इवातिकान्तः प्रान्तस्स काश्मीर इति प्रतीमः ।।

(१३)

काश्मीरनाम्नीमवगुण्ठनेन कान्तां तुषाराकृतिना किमर्कः ।
प्रसूनमूर्ध्नीं स्पृशतीह मुग्धां कामीव नित्यं मृदुभिः कराग्रैः ।।

(१४)

किमेष कान्तावलितोपमानं सदोपभोगं भजतां ददानः ।
परां तथा निर्वृतिमादधानः काश्मीरनामा नवकाव्यबन्धः ॥

(१५)

सुजातमुद्यानवनैस्सुमानां वसन्तकाले मिषतां जनोऽमुम् ।
अनेकवर्णेषु विलोकनीयैः दिदृक्षुरायाति दिगन्ततोऽपि ॥

(१६)

अदभ्रशष्पासु तृणस्थलीषु चरन्ति मेषाः मृदुरोमशेषाः ।
वासांसि रोमाणि निकृत्त्य येषां वितन्वते शीतनिवारणाय ॥

(१७)

वसन्तकाले स्फुरितांकुरेषु श्यामेषु शय्योपमशाद्वलेषु ।
गुल्मार्गधाम्नि प्रसभं नराणां समेयुषां श्राव्य इहारवारः ॥

(१८)

करापचेयं वहतां फलौघं विराजतां सेवफलद्रुमाणाम् ।
प्रपूर्णमुद्यानवनैः प्रकामं प्रकाशतेऽसौ शरदि प्रदेशः ॥

(१९)

कैदारिकाभिश्शरदि प्रफुल्लकाश्मीरपुष्पोद्भवसौरभीभिः ।
सुगन्धिरन्धे कलितांगरागाः काश्मीरनाम्नी तरुणी मनोज्ञा ॥

(२०)

स चन्द्र इन्दुप्रतिमाननाभिः सरोवरे निर्मलनीलकान्तिः ।
सशारदाभ्रो हिमशुभ्रशैलैः शरन्निशाकाश इवैष देशः ॥

(२१)

उपत्यकां नित्यहिमां हिमाद्रेः कथञ्चिदारुह्य विहर्तुकामः ।
चक्रं विना स्लेढ्जति वाहनेन नीचैर्वहत्यत्र जनस्सवेगम् ॥

(२२)

अदभ्रशुभ्रं हिमपातहेतोः अवेक्षितुं शान्तजनप्रचारम् ।
अहो समायाति कुतूहलीमतीव शीतं शिशिरेऽपि लोकः ॥

(२३)

घनानि रोम्णां वसनानि धृत्वा क्रीडन्ति कृत्वाऽसितकाचमक्ष्णोः।
केचित्पुनः कृत्रिमदारुपादाः गुल्मार्गधाम्नि प्रथिते हिमेषु ॥

(२४)

बर्हिर्मुखानामपि तत्र नृणामेको हि नूनं शिशिरे प्रभेदः ।
अंगारवत्काँगडिकुक्षिहेतोः भवन्ति बर्हिर्जठरा यतोऽमी ॥

(२५)

ऋतुष्वशेषेषु निषेवणीयं ऋच्छन्ति काश्मीरमिमं प्रदेशम् ।
ऋते जना देशविदेशभेदात् ऋतं सदा भोगकृते कृतार्थाः ॥

(२६)

काश्मीरसौन्दर्यनिरीक्षणाय मनोविनोदाय दिने दिनेऽत्र ।
आकाशयानैरुपयान्त्यनेके पाश्चात्यदेश्या अपि भारतीयाः ॥

(२७)

विमानयानं गमनाय नित्यं विशालनीलं सुरवर्त्म सेव्यम् ।
वसुन्धराऽभ्युन्नतभूषु वासः काश्मीरमेनं त्रिदिवं तदाहुः ॥

(२८)

आरोढुकामाश्शिखरं हिमाद्रेः प्रालेयगूढं पथिकाः पदाभ्याम् ।
आयान्ति पाथेयवहा अनेके एकाकिनो वृन्दश एव वाऽत्र ॥

(२९)

विज्ञानिभिस्तत्र विचारणीयं विवस्वता विस्फुरता विनैव ।
विकासमायान्ति विचित्रमत्र विलासिनीनां वदनाम्बुजानि ॥

(३०)

कस्रस्य काश्मीरवधूजनस्य नम्रस्य किंचित्कुचयोर्भरेण ।
ताम्रायमानद्युति गण्डयुग्ममाम्रस्य साम्यं वहते फलस्य ॥

(३१)

कपोलकान्तेः कमलेक्षणानां यत्रानुकृत्या कृतया भवन्ति ।
शनैः शनैः पाटलिमानमेत्य सेव्यानि नस्सेवफलानि नूनम् ॥

(३२)

उत्साहना उत्सवदा उदाराः उत्कैरुपेताः उपलब्धतर्षैः ।
उर्व्याः उदित्योदकमुद्भ्रमन्तः उद्वेलयन्त्युत्सुकभावमुत्साः ॥

(३३)

काश्मीरनाम्नी तरुणी किमेषा हेमन्तशीतौ किमृतू निशीथः ।
किं कम्बलोऽयं धवलस्तुषारः शेते यमावृत्य नतोन्नतांगी ॥

(३४)

प्रभातकालो नु वसन्तकालः स्नानावलेपादि यदा समाप्य ।
विभूषितांगीव विभाति पुष्पैरनेकवर्णैरतिलोभनीयैः ॥

(३५)

निदाघवर्षासमये पुनस्सा फलैरनेकैः फलिता रसाढ्यैः ।
विभाति पुष्टा विविधैरभीष्टैः स्वादिष्ठमिष्टैः कृतभोजनेव ।।

(३६)

शरत्तदीया शयनीयवेला शय्यां महार्हां स्वयमेव यस्याम् ।
अनोकहानां पतयालुपर्णैः तनोति मृद्वीं मृदितैर्हिमेन ।।

(३७)

काश्मीरराज्येऽन्यतमः प्रशान्तः सीमन्तितस्सुन्दरसिन्धुनद्या ।
ललामभूतः किल भारतस्य लदाकनामा लसति प्रदेशः ।।

(३८)

किं मण्डलं चन्द्रमसो नराणां नतोन्नतं दर्शयितुं सुशीतम् ।
महीतले वीततृणो विशालो लदाकदेशो रचितो विधात्रा ।।

(३९)

समुच्चयो यत्र शिलोच्चयानां विना द्रुमैर्वल्लिकुलैश्च फुल्लैः ।
अनेकवर्णानवलोकनीयान् शिलाभिरेव प्रकटीकरोति ।।

(४०)

किमश्मवेश्मानइमे पुराणाः जीर्णा विशीर्णाः परितो विकीर्णाः।
इतीव संदेहमितो दुहानाः समिन्धते सानुमतां समूहाः ।।

(४१)

यत्र स्रवन्निर्झरतीररूढैः श्यामैर्द्रुमैर्वल्लिकुलैरनेकैः ।
वहन्त्युरोभिर्विपुलैर्महीध्राः हरिन्मणीनामिव हारिहारान् ।।

(४२)

काश्मीरनाम्नः कवनीयभूम्नः राज्यस्य सा राजति राजधानी
आलिंगिता शीतलझीलनद्या श्रिया युता श्रीनगराभिधाना ॥

(४३)

झीलापगायास्सलिलैस्समृद्धः आवासनौकानिवहावरुद्धः ।
यतश्शिकाराख्यतरण्युदीर्णः सरोवरो भाति दलाभिधानः ॥

(४४)

जलाशये तत्र दलाभिधाने जनश्शिकाराप्लवनीयमानः ।
युवा युवत्या च नवोढया वा न वा कुटुम्बी रमते विरामे ॥

(४५)

पश्यन्ति पान्थाः प्लवमानमप्सु मनोज्ञमुद्यानमनेकमत्र ।
इदं हि लोके नितरां प्रसिद्धं जलप्लुतोद्यानवनाभिधानम् ॥

(४६)

चत्वार एते किमु पूरुषार्थाः मूर्ता विराजन्ति तटाकमध्ये ।
चत्वार इत्थं भ्रममादधन्ति चिनारसंज्ञास्तरवो विशालाः ॥

(४७)

तटे तटाकस्य दलाभिधस्य विभाति शीतामलतोय उत्सः ।
उत्सेषु राजेव विराजमानः यश्चश्मशाहीति यथार्थनामा ॥

(४८)

निशातनामोपवनं जनानां निर्विश्य निश्शेषतया निषेव्यम् ।
विनिद्रपुष्पद्रुमवल्लिपूर्णं निषिक्तमुत्सैर्निकटे निरीक्ष्यम् ॥

(४९)

काश्मीरभूम्याः कमनीयतायां उन्मादयन्त्यां हृदयंगमायाम् ।
सम्राट् स श्रृंगारपरो जहांगिर् किमत्र चित्रं विवशो यदासीत् ।।

(५०)

स शालिमार्संज्ञमभिज्ञ एतत् मनोज्ञमुद्यानवनं वितेने ।
पुष्पद्रुमैः पुष्पितवल्लरीभिः प्रपूर्णमुत्सैर्मृदुशाद्वलैश्च ।।

(५१)

श्रृंगारकामेन जहांगिरेन संगीतमाध्वीकरसोन्मदाभिः ।
संगम्य सौम्याभिरिह व्यधायि रंगो रसोत्तुंगरतोत्सवस्य ।।

(५२)

भूषा जुषाणा अवरोधयोषाः वेषेण पुष्पद्रुमनिर्विशेषाः ।
दोषा न पश्यन्निह विभ्रमार्थी तोषाय नूनं भ्रमसाप भूपः ।।

(५३)

उत्साम्बुना पूरितमुत्तरंगं उद्यानमध्ये सर उल्ललास ।
विलासिनीभिर्विलसन्मुखीभिर्विडम्बयद्नम्बरमम्बुजिन्याः ।।

(५४)

कथं जहांगीरिह चक्रवर्ती रेमे पुरा यौवतचक्रवर्ती ।
कथामिमां बोधयितुं जनानां भाभारतीभ्यां क्रियते प्रयत्नः ।।

(५५)

वनेषु चोत्सेषु वधूजनेषु नदीषु वृक्षेषु नगावलीषु ।
यथाऽस्य लावण्यगुणस्तथैव विशिष्यते शिष्टगुणो नरेषु ।।

(५६)

सहस्रसंवत्सरपूर्वमत्र सरस्वतीसत्सुतवर्णनार्हाः ।
गीर्वाणवाणीकवयः प्रसिद्धाः चकाशिरे कल्हणबिल्हणाद्याः ॥

(५७)

अलंचकारात्र सभां नृपाणां क्षेमेन्द्रनामा स महाकविश्च ।
येन प्रबन्धाश्शतशः प्रशस्ताः प्रणिन्यिरे प्राञ्जलसंस्कृतेन ॥

(५८)

जगद्गुरुश्शंकर आदिमोऽपि वेदान्ततत्त्वावगमाय पूर्वम् ।
तेपे तपस्तीव्रमिहाभ्युपेत्य श्रीशंकराचार्यगिरौ प्रसिद्धे ॥

(५९)

व्यासेन संगृह्य वचः श्रुतीनां श्रीब्रह्मसूत्रस्य पुरा कृतस्य ।
अन्विष्य बोधायनभाष्यमायुः रामानुजाचार्यवरा अपीह ॥

(६०)

काष्ठे द्विषद्भिः दृढकीलितोऽपि क्रोष्टो विमुक्तो वयसः परार्धम् ।
काश्मीरमेत्यानर्यदित्युदन्तः आकर्ण्यते कश्चन भित्तिहीनः ॥

(६१)

गुरोर्मताद्यस्य महम्मदस्य महम्मदीया इह केशलेशम् ।
निक्षिप्य पूज्यं किल पेटिकायां हस्रत्बले मस्जिदि पूजयन्ति ॥

(६२)

क्षीराब्धिकन्या किल संबभूव दुर्गा पुरा दुर्गतिनाशनाय ।
मत्वेति किं मातरमत्र दुर्गां क्षीरेण सर्वे परिपूजयन्ति ॥

(६३)

काश्मीरराज्ये हिमशैलमध्ये प्राच्यां दिशि श्रीनगरस्य तस्य ।
गिरेर्गुहायाममरेश्वरस्य देवालयो भात्युमया युतस्य ॥

(६४)

दिवौकसां तारकपीडितानां स ईप्सतां तारकजित्कुमारम् ।
भद्राय पुत्रोद्भवमत्र कुर्वन् उपासितस्तैरमरेश्वरोऽभूत् ॥

(६५)

तदर्थमद्रेस्सुतया शिवस्य विवाहमैच्छंस्त्रिदिवौकसः प्राक् ।
परं तु कामं दहता शिवेन कामस्सुराणामभवत्स दग्धः ॥

(६६)

स्वयं ततश्शैलसुता कठोरं तप्त्वा तपस्तोषयति स्म शम्भुम् ।
व्युवाह गौरीं गिरिशोऽथ तेन बृन्दारकाणां च ननन्द बृन्दः ॥

(६७)

उमासमेतस्स पुरा पुरारिः चिरं परिभ्रम्य हिमाद्रिमौलौ ।
विश्रान्तिकामोऽमरनाथभूभृद्गुहामिमां प्रापदितीरयन्ति ॥

(६८)

श्रमापनोदाय शिवोऽप्युमायाः सुखेन सुप्तेति स तामजानन् ।
कपोतयोर्हादधतोस्स्वरेण शृणोति सैवेति कथाश्चकार ॥

(६९)

कान्ता परिश्रान्तिहृदां कथानामन्ते कृतान्तेन कृतेऽन्तकस्य ।
संतापिपापप्रभवस्य मृत्योरन्तं कपोतद्वयमप्यवाप ॥

(७०)

अद्यापि तावात्तकपोतरूपावमर्त्यभूतावमरेश्वरस्य ।
अनुग्रहं प्राप्तुमनन्यकामावत्रानुसंवत्सरमभ्युपेतः ॥

(७१)

भक्ताग्रगण्यौ परमेश्वरस्य शक्तो न तौ वीक्षितुमत्र सर्वः ।
सक्तश्शिवे शक्तियुते सदैव भक्तः परं पश्यति जातु कश्चित् ॥

(७२)

शैलस्य मौलावमरेश्वरस्य सरोवरो राजति रामनामा ।
यद्वारि नीचैः प्रसृतं हिमत्वं संप्राप्य धत्ते शिवलिंगरूपम् ॥

(७३)

रामश्शिवोऽयं शिव एव रामः भेदो न कश्चिच्छिवराममध्ये ।
आख्याति किं तत्त्वमिदं शिवत्वमालम्बितं रामसरोवराम्भः ॥

(७४)

प्रसन्नतोया धवलोपलेषु प्रवाहिता नद्यमरावतीति ।
प्रकामशीता शिवपादपूता प्रशान्तपापप्रभवा विभाति ॥

(७५)

प्रणन्तुकामाः अमरेशपादं भवन्ति तस्यामवगाह्य पूताः ।
शीतेन तस्यास्सलिलेन तेषां तापत्रयं दूरमपैति सद्यः ॥

(७६)

पुरो सुराणाममरावती किं पुरन्दरं नाकमितो निनीषुः ।
पुरो गिरेर्निर्झरिणी भवन्ती पुरारिमाराधयतीह पुण्या ?

(७७)

प्रभुं प्रणम्यामरनाथमत्र प्रसादरूपेण विभूतिकल्पम् ।
प्रपद्य चूर्णं पतदश्मनोऽधः प्रमोदते भक्तजनः प्रकामम् ।।

(७८)

यं सर्वलोकाः अमरावतंसं संसिद्धिदं श्रावणपूर्णिमायाम् ।
